Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 2 | ISSN : 2581- 6306

# धर्मशास्त्रे दायविभागप्रसङ्गे मानवाधीकार



**डा.सुधांशुशेखरमहापात्र,**
सहाचार्यः, धर्मशास्त्रविभागः,
राष्ट्रियसस्कृतविद्यापीठम्, तिरुपतिः

**सारांश :-** मानवानां बहुषु कर्मषु अधिकार दृश्यते, यतो हि मनुना तदधिकारविषये विभिन्नप्रसङ्गः समुत्थापितः। मानवधर्मशास्त्रे मानवानां अधिकारविषये नैके प्रसङ्गाः आयान्ति तेषु आचारः, व्यवहारः, संस्कारः, प्रायश्चित्तः, श्राद्धः, राजधर्मादयः प्रमुखा भवन्ति। एतेषु विषयेषु मया व्यवहारान्तर्गत दायाधिकारविषये किञ्चित् उपस्थाप्यते।

'धृ'धारणपोषणयो इत्यस्मात् धातोः 'मन् ' प्रत्यये कृते धर्मशब्द निष्पद्यते। स एव धर्म कर्त्तव्यं पालनं धारणं चेत्यादि नानाविधान् अर्थान् प्रतिपादयति। न तु धर्मशब्देन Religion इति अर्थः बोद्धव्यः। यतो हि स शब्दः सम्प्रदायविशेषं बोधयति न तु कर्त्तव्यम्। यथा हिन्दुधर्मः, मुस्लिमधर्मः, ख्रीष्टधर्मः इत्यादि। वस्तुत: अयं धर्मः कर्त्तव्यविशेषं बोधयति यथा छात्राणां अध्ययनं धर्मः, पालनं च बोधयति यथा पृथिव्याः पालनं धर्मः, जलस्य निम्नगामित्वं धर्म इत्यादि। तस्यैव धर्मस्य प्रतिपादकं यत् शास्त्रं तत् धर्मशास्त्रम्। धर्मशास्त्रस्य प्रथमप्रवर्तक: भगवान् मनुः। अत: मनुना प्रोक्तं यत् धर्मशास्त्रं तत् मानवधर्मशास्त्रं इति कथ्यते। मानवधर्मशास्त्रमध्ये मनुस्मृति: प्रमुखतां भजते। यद्यपि मानवधर्मसूत्रं इति श्रुयते, तथापि तस्य अस्तित्वं नास्तीति कथ्यते। यद्भवतु तत्सर्वं मनुप्रेरितमिति। अतएव तत् अपत्यानां कृते (मनो: अपत्यं पुमान् मानवः) यः अधिकारः प्रतिपादितः स एव मानवाधिकारः इति कथ्यते।

दायशब्द: अतीवप्राचीन: स च वैदिकसाहित्येपि प्रयुक्त दृश्यते। प्रसङ्गेऽस्मिन् तैतिरीयसंहितायां उक्तं यत् - **"मनुः पुत्रेभ्यो दायं व्यभजत् इति[१]"** पुनश्च **"तस्माज्ज्येष्ठं पुत्रं धनेन नीरवसाययन्तिर[२]"**। ब्राह्मणग्रन्थेषु दायशब्द: पैतृकं धनं बोधयति । यथोक्तं ताण्ड्यब्राह्मणे[३]-

**तस्माद्यः पुत्राणां दायं धनतममिवोपैति तं मन्यन्ते यमेवेदं भविष्यतीति।।**

मनुना स्त्रीपुंधर्मेविभागश्च इत्यत्र अष्टमाध्याये मनुस्मृतौ विभागशब्देन दायभागमेव प्रतिपादितः। संसारेऽस्मिन् सर्वे जना: एकत्रैव अवस्थातुं न अर्हन्ति। यद्यपि संयुक्तपरिवार: बहुत्र दृश्यते प्रशंस्यते च तथापि पृथकवस्थानेन धर्म वर्धते। अतएव उक्तं मनुना[४]-

**एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया।**
**पृथग्विवर्धते धर्मस्तस्माद्धा पृथक् क्रिया।।**

अत: दायविभागे मानवानां अधिकारः विद्यते। दायशब्देन पैतृकधन बोधनात् पितृपितामहप्रपितामहादि धनस्य पुत्रपौत्रप्रपौत्रादिभिः यः विभागः क्रियते स एव दायभागपदेन बोध्यते। न तु दायस्यभाग: दायभाग: दायस्य विनाशापत्तेः न वा दायेन सह भागोपि दायभाग: इति वक्तुं शक्यते। यतो हि दायेन सह विद्यमानेऽपि जन: न ममेदं द्रव्यं अपि तु मम भ्रातुरिति प्रयोग दर्शनात्। अत: दायभागशब्दः न यौगिक: अपितु पैतृकधने विभाजने अर्थे रुढः । अस्मिन् प्रसङ्गे नारदवचनमुत्थाप्य जीमूतवाहनेन दायभागे[५] उक्तं यत्-

**विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।**
**दायभाग इति प्रोक्तं तद्विवादपदं बुधैः।।**

अत: पित्रादिधने पुत्राणां अधिकारः सिध्यति। स च दायभाग: कदा भवति इति जिज्ञासायां मनुना[६] उक्तं यत् –

**ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।**
**भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः।।**

अनेन जीवतो: पित्रो:धने पुत्राणां अधिकारो नास्तीति प्रतिपाद्यते। तस्मात् पितुः मातुश्च मरणानन्तरमेव पुत्राणां दायाधिकार सिध्यति। अनेकेषु पुत्रेषु सत्सु सर्वेषां पैतृके धने अधिकारे सिद्धेऽपि ज्येष्ठस्य विंशोद्धारः मध्यमानां प्रत्येकं चत्वारिंशत्तमोद्धार: कनिष्ठस्य च अशितितमोभागो

उद्धाररुपेण परिकल्पित: एवं उद्धारे उद्धृते अवशिष्टं पैतृकं धनं सर्वे पुत्राः पुन: समं विभजेरन्। प्रसङ्गेऽस्मिन् मनुना[७] उक्तं यत् -

**ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।**
**ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः।।**

पुत्राः पैतृकधनं विभज्य गृहीत्वा पितुराज्ञापालनं कुर्वन्ति। पितुः मरणात् अनन्तरं च पिण्डदानादिकं कृत्वा सद्गतिं प्रापयन्ति। यदि पुत्रा: नपुंसकाः, अन्धः, बधिराः, उन्मत्तकाः जडा: वा भवन्ति तर्हि तेषां पैतृकेधने अधिकारो नास्ति परन्तु ते केवलं ग्रासाच्छादनभाज: भवन्ति। यथोक्तं मनुना[८]-

**अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।**
**उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः।।**

कन्यानां पैतृके धने अधिकारोनासीत्। सर्वं पैतृकं धनं पुत्रा: विभज्य गृहीत्वा स्वेभ्ये स्वेभ्य भागेभ्य चतुर्थांशं कन्याभ्यः दद्युः इति नियमो असीत्। एतेन कन्याभ्यः धनं अदाने पुत्राः पतिता भविष्यन्ति इत्यपि मनुना[९] प्रतिपादितम्। तदुक्तं तेन-

**स्वेभ्योऽशेभ्यस्तु कन्याभ्यः प्रदार्धातरः पृथक् ।**
**स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः।।**

एतेन कन्या पुत्रांशस्य चतुर्थांशभागिनीति प्रतियते। सत्सु पुत्रेषु मातुरपि धनाधिकारो नास्ति। अत: अपुत्र धनैव पत्न्याधीकारः सिध्यति। भ्रातृणामभावे भगिन्यो: धनाधिकारीन्यो भवन्ति। अनेकासु कन्यासु प्रथमं अविवाहितानां पैतृकेधने अधिकार: तदभावे विवाहितानां कन्यकानां। तत्रापि अनेकासु विवाहिताषु कन्यकासु पुत्रवतिनां अधिकारः। एवंविधः कन्याभावे बन्ध्याविधवाविपर्यस्तपुत्राणामपि दुहितृणां धनाधिकार: सिध्यति। अस्मिन् प्रसङ्गे दायभागे जीमूतवाहनेन स्पष्टतया प्रतिपादनं कृतम्। किन्तु आधुनिकहिन्दुविध्यनुसारेण स्त्रीस्वामिकं धनं एव स्त्रीधनम् अर्थात् यस्मिन् धने केवलं स्त्रीयामेव स्वाम्यं तत् स्त्रीधनम्। तत् धनं मुख्यत: त्रिषु विभिन्नासु अवस्थासु प्राप्यते यथा अविवाहितावस्थायाम् पितृमातृकुलात्, वाक्दत्तावस्थायां उपहाररुपेण वरपक्षतो यत् लब्धं, भर्तुगृहगमनावस्थायां आत्मयानां पक्षत: यत् धनं प्राप्यम्। यदि

काचिद् कन्या स्त्रीधनस्य अधिकारिणि भूत्वा अविवाहितावस्थायां म्रियते तर्हि तस्या स्त्रीधनं प्रथमं सहोदरभ्राता ततः भिन्नोदरभ्राता तदभावे माता तदभावे पिता ततश्च पितृश्वषु प्रभृतयः गृह्णन्ति।

सर्वप्रथमं १९४३ ख्रीष्टाब्दे स्त्रीणां पैतृकसम्पतौ अधिकारः सिद्धः अभूत्। ततः पूर्वं तासां भर्तृदत्त, पितृलब्धधने ,उपहारादिषु च अधिकार आसीत्। परन्तु ताः ग्रासाच्छादनभाजः भवन्ति स्म। अनन्तरं १९५६ ख्रीष्टाब्दे जुन्मासे यदा हिन्दुउत्तराधीकारविधिः मान्यता प्राप्तः तदारभ्य स्त्रीणां दायाधिकारः सिद्धो जातः। अविभक्त हिन्दुपरिवारे एकस्य मरणानन्तरं तस्य धनं तत्परिवारस्य अन्यासां सदस्यानां यत् भवति, तत् उत्तरजीविसूत्रेण प्राप्यते। अतएव मृतस्यधनं उत्तरजीविस्वत्वरुपेण अन्ये लभन्ते। परन्तु पितुः मरणानन्तरं पैतृके धने पुत्राणां यत् विशेषस्वत्वं तत् उत्तराधीकार सूत्रेण प्राप्यते। आधुनिकहिन्दुविधौ पुत्राधिकारिणः श्रेणित्रयेण विभक्ताः प्रथमश्रेणीदायादाः, द्वितीयश्रेणीदायादाः, ततश्च सगोत्र असगोत्र अपिण्डादिनाम् अधिकारः आयाति।

प्रथमश्रेणी दायादमध्ये- पुत्र, कन्या, विधवापत्नी, माता, पौत्र,पौत्रा, दौहित्र-दौहित्री, विधवापुत्रवधु, प्रपौत्र-प्रपौत्री, विधवापौत्रबधुश्चेति द्वादशः अन्तर्भवन्ति।

द्वितीयश्रेणी दायादमध्ये- पिता, पौत्र्यापुत्रः, कन्या, भ्राता भगिनी च ,

३- दौहित्रस्यपुत्रः-कन्या,दौहित्र्यापुत्रः,दौहित्र्याकन्या च ,,

४- भ्रातृपुत्र, भगिनीपुत्र, भ्रातृकन्या,भगिनीकन्या,

५- पितामह,पितामही,

६- मातुल,मातृष्वसा, एतेषामभावे सगोत्रसपिण्डाः, असगोत्रसपिण्डादयः धनं गृह्णन्ति।

## निष्कर्षः

प्रचीनकाले नारीणां पैतृकधने स्वत्वं नासीत् ता केवल ग्रासाच्छादन भागिन्यः आसन्। परन्तु १९२९ख्रीष्टाब्दे नारिषु प्रथमं पौत्री, दौहित्री, भगिनीनाम् अधीकारो लब्धः। ततश्च १९३७ ख्रीष्टाब्दे विधवापत्न्याः भर्तृदाये केवलं भोगाधिकारः प्राप्तः, तदनन्तरं १९५६ ख्रीष्टाब्दे सर्वविधानं नारीणां उत्तराधीकारस्वत्वं आगतम्। तदा भ्रातृभागमनुश्रुत्य भगिन्यः तत्चतुर्थांशहारिण्यः भवन्ति स्म। स च परिमाणः केवल विवाहोपयोगि न तु ततोधिकः। किन्तु सम्प्रति पितुः स्वार्जितधने पुत्रकन्ययोः तुल्याधिकारः तुल्यभागभागिता च दृश्यते । प्राचीनकाले क्लीव, जन्मान्ध, जन्मबधिर पतितादिनां दायाधिकारनासीत्। सम्प्रति तु तेषां अधीकारविद्यते किन्तु केवलं नरहत्याकारिणः पैतृकधनेअधीकारो नास्ति। पुनश्च प्राचीनेकाले पित्रा सह पुत्रै विभागे क्रियमाणे क्रमागत स्थावरसम्पत्तेः पितर्भागद्वयं पुत्राणां च एकैकभाग प्राप्तव्य आसीत्। सम्प्रति तु पितापुत्रयोः

तुल्याधीकारः सम्प्रति केवलं मत्त-प्रमत्त- विकृतमस्तिष्क-गृहितधर्मान्तराणां वा दायाधीकारो न दीयते। एवं धर्मशास्त्रे मानवाधीकरप्रसङ्गे कुटुम्बानां दायाधीकार : प्रतिपादितः।

## पादटिप्पणी

१.तै.सं.- ३/१/९/४

२.तै.सं.- २/५/२/७-४

३.ताण्ड्य.ब्रा.-१६/४/३-४

४.म.स्मृ.- ९/११

५.दायभागः -पृ-११

६.म.स्मृ. - ९/१०४

७.म.स्मृ. - ९/११२

८.म.स्मृ.- ९/२०१

९.म.स्मृ.- ९/११८

## सन्दर्भग्रन्थसूची

१.ताण्ड्यमहाब्राह्मणम् - चौखम्बा संस्कृत सीरिज आफीस,वाराणसी, १९७१

२.तैत्तिरीयसंहिता - आनन्दाश्रममुद्रणालय, पुना, १८९८

३.दायभागः - मोतिलालवनारसीदास, वाराणसी, १९८२

४.मनुस्मृतिः - चौखम्बा संस्कृत संस्थान, वाराणसी, २००३